पर्य्याप्त्यधिकरणद्वयसम्बन्धित्वेन नवादिपुंसां प्रत्ययः। द्वौ त्रयो वा येषां इत्यन्यतरार्थकवाशब्देन विग्रहे द्वित्राः पञ्चषाः इत्यादौ। द्वित्वत्र्यन्यतरपर्य्याप्तस्वपर्य्याप्तसंख्यासम्बन्धित्वेन द्वयोस्त्रयाणां वा पञ्चषाणां बोधः। षट्के षट्के वा षट्त्वमित्याद्यनुरोधेन वाकारस्यान्यतरार्थकतायाः व्युत्पाद्यत्वात् तस्य च वृत्तौ गतार्थत्वादश्रुतिः पञ्च षड् वा येषामित्यादिविग्रहात् पञ्चषाः पुरुषाः इत्यादावप्युक्तरीत्यैवान्वयोद्रष्टव्यः। परे तु द्वौ वा त्रयो वा येषामित्यादिविग्रहे वाशब्दस्य संशयकोट्यर्थकतया द्वित्राः इत्यादि बहुव्रीहेः स्वधर्मिकसंशयकोटितापन्नद्वित्वसम्बन्धित्वेन द्विप्रभृतिबोधकत्वमित्याहुः”। वैयाकरणास्तु बहुव्रीहिप्रकरणपठितत्वमेव तत्त्वमित्याहुः तेन उन्मत्तगङ्गाद्यव्ययीभावे नातिव्याप्तिः। तद्भेदौ च तद्गुणातद्गुणसंविज्ञानौ तद्गुणसंविज्ञानशब्दे ६२१७ पृ० उक्तौ तत्र समानाधिकरणपदघटितस्यैव प्रायेण साधुत्वम्।

**बहुशत्रु** पु० ६ब०। १चटके शब्दच०। २अनेकशत्रुयुते त्रि०। “बहुशत्रुः पटोले स्यात्” ति० त०। [युक्ते त्रि०।

**ब(व)हुशल्य** पु० ६ब०। १रक्तखदिरे राजनि०। २अनेककील-

**ब(व)हुशस्** अव्य० ब(व)हु+शस्। अनेकवारानित्यर्थे ‘गुणवत्यो ब(व)हुशो नियोजिता’ इति कुमारः।

**ब(व)हुशाल** पु० ब(व)हुभिः शालते शाल-संज्ञायां कर्त्तरि अच्। १स्नुहीवृक्षे राजनि०। [२अनेकशिखायुक्ते त्रि०

**ब(व)हुशिखा** स्त्री० ६ब०। १जलपिप्पल्याम्। राजनि०।

**बहुशिरस्** पु० ६ब०। विष्णौ “रुद्रो बहुशिरा बभ्रुः” विष्णुस०।

**बहुशृङ्ग** पु० ६ब०। विष्णौ हेमकरः “चत्वारि शृङ्गा” “त्रयो अस्य पादाः” इत्यादिश्रुत्या तस्य तथात्वम्।

**बहुश्रुत** त्रि० श्रु-भावे क्त ६ब०। अनेकशास्त्रश्रुतियुक्ते मनुः ४।१२५। [अनेकश्रेयसीयुक्ते।

**बहुश्रेयसी** त्रि०। ६ब० ईयसन्तत्वात् न कप् न वा ह्रस्वः।

**बहुसन्तति** पु० बहुः सन्ततिर्विस्तारोऽस्य (वेडुँबाँश) १वंशभेदे शब्दच०। २अनेकसन्तानयुक्ते त्रि०।

**बहुसम्पुट** पु० ६ब०। विष्णुकन्दे राजनि०।

**ब(व)हुसार** पु०६ब०। १खदिरे राजनि० २अनेकसारवति त्रि०

**ब(व)हुसुता** स्त्री० ब(व)हवः सुता इव मूलान्यस्याः। १शतमूल्याम् अमरः। २अनेकपुत्रयुते त्रि०।

**बहुसू** स्त्री बहून् सूते सू-क्विप्। १शूकर्यां शब्दर०। २अनेकप्रसवकर्त्र्यां स्त्रियाञ्च।

**ब(व)हुसूति** स्त्री० ६ब०। १अनेकप्रसववत्यां २गवि अमरः। २ब(व)हुप्रसवयुते स्त्रीमात्रे च।

**ब(व)हुस्रवा** स्त्री० ब(व)हु यथा तथा स्रवति स्रु-अच्। १शल्लकीवृक्षे शब्दच०। २अनेकधा क्षरणवति त्रि०।

**बहूदक** न० बहूनि उदकानि शौचाङ्गतया यस्य। सन्न्यासिभेदे कुटीचकशब्दे दृश्यम्। [कात्मजयुते त्रि०।

**बह्वपत्य** पु० ६ब०। १शूकरे २मूषिके च राजनि०। ३अने-

**बह्वादि** विभाषया स्त्रियां ङीष्प्रत्ययनिमित्ते शब्दगणे स च गणः पा० ग० उक्तो यथा “बहु पद्धति अञ्चति अङ्कति अंहति शकटि शक्ति (शस्त्रे) शारि वारि राति राधि अहि कपि यष्टि मुनि (इतः प्राण्यङ्गात्) चण्ड अराल कृपण कमल विकट विशाल विसङ्कट भरुज ध्वज चन्द्रभाग (अनद्याम्) कल्याण उदार पुराण अहन् क्रोड नख खुर शिखा बाल शफ गुद” आकृतिगणोयम् “तेन भग गल राग इत्यादि ग्रहणम्”।

**बह्वाशिन्** त्रि० बहु अश्नाति अश-णिनि। १बहुभोजनशीले स्त्रियां ङीप्। “बह्वाशी स्वल्पसन्तुष्टः सुनिद्रः शीघ्रचेतनः। प्रभुभक्तश्च शूरश्च ज्ञातव्याः षट् शुनो गुणाः” चाणक्यः। २धृतराष्ट्रपुत्रभेदे पु० भा० आ० ६७ अ०।

**ब(व)ह्वृच्(च)** त्रि०६ब०अध्येतर्य्येव अच्समा०नान्यत्र।१ऋग्वेदे २सूक्ते न०। ३तदध्येतरि पु०। ४तत्पत्न्यां स्त्री।

**बा(वा)ड़** अ आप्लावने सक० स्नाने अक०भ्वा०आ०सेट्। बा(वा)ड़ते अब(वा)ड़िष्ट। ऋदित् चङि न ह्रस्वः अबबाड़त् त।

**बाड़व** न० बड़वानां समूहः अण्। १घोटकीसमुदाये। बाड़ घञ् बल-घञ् लस्य डो वा बाड़ो वृद्धिः तं वाति वा-क वा। २ब्राह्मणे पु०। बड़वायां जातः अण्। ३और्वे समुद्रस्थे कालाग्निभेदे पु०हेमच०। वाड़वाग्न्यादयोऽप्यत्र पु०। [शब्दमा०।

**बाड़वेय** पु०द्वि०बड़वायाः अपत्यम्-ढक्। अश्विनीकुमारयोः

**बाड़व्य** न० बाड़व+समूहे-यत्। विप्रसमुदाये। [रत्नमा०।

**बाडिङ्गन** पु० बाडे इव इङ्गते इङ्ग-ल्यु। वार्त्ताकौ

**बा(वा)ण** पु०बण-शब्दे वण-गतौ वा संज्ञायां कर्त्तरि घञ्। १शरे, २गोस्तने, (बांट) ३विरोचनसुते ४दैत्यभेदे, ५केवले च ६शरपुङ्खे ७नीलझिण्ट्याम् पुंस्त्री० अमरः ८बाणमूले स्त्री मेदि०। मेदिन्यां दन्त्योष्ठ्यवादित्वेन पठितः रायमुकुटादयस्तु बण शब्दे इति धातुप्रकृतिकत्वमाहुरतोऽस्योभयविधादित्वम्। बल-भावे घञ्। ९शब्दे १०तदधिष्ठातृदेव्यां सरस्वत्यां स्त्री उपचारात् ११वाक्ये अमरः।